
R
S
V
L
12369
015.1
N24
12369

12369

श्रीरामभवनग्रन्थमाला—४

॥ श्रीः ॥

।श्रीमदाचार्यार्याशतकम्॥

विद्याविनोद
का. ना. रामस्वामिशर्मणा
विरचितम् ॥

श्रीवाणीविलासमुद्रायन्त्रालयः
श्रीरङ्गम् ।
१९२४.



शमदमकरुणाप्रमुखैर्गुणगणमणिभिर्विभूषितान्वन्दे ।
सच्चिदुदानन्दशिवाद्यभिनवनरसिंहभारतीन्द्रगुरून् ॥



वीतरागकुलपूजितान्विधुतरागमोहमदमत्सरा-
न्बोधयोगपरिकर्मितान्हृदि च चिद्विलासपरिशोभितान् ।
अद्भुतासदृशसद्गुणानिशमाहृतान्प्रणतवत्सलान्
चन्द्रशेखरसुभारतीगुरुयतीश्वरान्वयमुपास्महे ॥

॥ श्रीः ॥

उपोद्घातः ।

अनितरसाधारणगुरुभक्तिवशंवदहृदयेन सुगृहीतनाम्ना श्रीरामस्वामिशर्मणा विद्वद्वरेण्येन प्रस्तावनाविलेखनाय मह्यं प्रेषितमिदमाचार्यशतकं सादरं सप्रेमबहुमानमुररीकृतम्। सत्स्वपि महनीयेषु विद्वत्सु मितप्रज्ञं मामेतस्मिन्नतत्प्रबन्धा नियोजयतीत्येतदपि मदीयप्राक्तनपरिपक्किमसुकृतफलमेव । प्रतिपाद्यमहिम्ना हि प्रबन्धमहत्ता । तत एव खलु महाभारतरामायणादीनां ग्रन्थान्तरेभ्यः सर्वोत्तरा प्राशस्ती । अस्मिन् प्रबन्धे तादृशं प्रतिपाद्यनिबन्धनं महत्त्वं सुसङ्गतं वरीवर्ति । प्रबन्धभूषणायमाना आचार्यपादास्तु ज्ञानवैराग्यशेवधयः जितारिषड्वर्गाः वेदान्तविद्याविहारसौधतलहृदयकमलाः ब्रह्मनिष्ठाः शमप्रधानाः समलोष्टाश्मकाञ्चनाः भावनाप्रकर्षभावितब्रह्मापरोक्ष्याश्च चिरायमेदिनीमलङ्कृत्य ब्रह्मभूयं गता इत्येतदनावृतमखिलजनानाम् । न्यायमीमांसादिशास्त्रविशारदपण्डितप्रकाण्डमण्डलमण्डनवाग्वैभवावधीरितधिषणाश्रावर्तिषत । आदिशङ्करभगवत्पादाभिन्ना इत्येव पृथुलां प्रथामविन्दन्त पृथिव्यां योगमहिम्ना ॥

अविस्मरणीयं चैषां विद्वत्सु दानशौण्डीर्यम् । विक्रमादित्यभोजप्रभृतयो नरपतय इव विद्वत्पक्षपातिनः परगुणग्रहणैकतत्पराः अर्थिजनप्रार्थितार्थकल्पनाकल्पवृक्षाः व्याख्यान-

सिंहासनासीनाः निस्तुषशेमुषीं वेदुषीं सर्वत्रोपन्यासेन प्रकाशयन्तः श्रुतिस्मृतिसम्मतसदाचारप्रतिष्ठापकाश्चावर्तिषत ।

केरलदेशान्तर्गते भगवत्पादसुजन्मना पवित्रिते श्रीमति कालटीक्षेत्रे भवभरुपथगतागतखिद्यमानचेतनोज्जिजीवयिषया आदिशङ्करभगवत्पाददिव्यविग्रहप्रतिष्ठामनन्यसाधारणीं चाकार्षुः ।

एतत्प्रबन्धुर्गुरुविषये विद्यमाना भक्तिरसाधारणी विस्मयनीया च । 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' इति किलाभियुक्तोक्तिः । तादृशगुरुभक्तिनिबन्धनश्रेयोऽधिगमार्हन्तीं विभ्रदयमभिज्ञैरभिनन्दनीय एव । 'यत्पादपङ्कजरजः पुनाति सद्यो गृहाणि शिष्याणाम् ।' इत्यादिभिः पद्यैर्गुरुविषये स्वस्य विद्यमानां भक्तिमयीं मनःप्रवृत्तिं स्पष्टयति । 'संसारे परिलुठनं—यावद्देहे ममता—संसारसिन्धुमग्नान्—भगवन्नास्मिन्नरके' इत्यादिपद्यैश्च स्वस्य असारे संसारे निर्वेदोऽपि सम्यगेव प्राकाशि । 'संसारकाननेऽस्मिन्—सहायमपरं विहाय गुरुचरणान्—विहरतु मनो मदीयं त्वदीयपदपङ्कजे नित्यम'—इत्यादिपद्यैरनन्यगतिकत्वमपि सम्यगुदघाटि । विषयवैलक्ष्येण सह वक्तृवैलक्षण्यमप्यत्र महदभिनन्दनहेतुः । मधुक्षीरन्यायेनान्योन्यासञ्जनेन द्वावप्यत्र शोभां पुष्णीतः ।

अस्मिन् प्रबन्धरत्ने सर्वाण्यपि पद्यानि मात्रावृत्तसंघटितानि छन्दःशास्त्रलक्षणानुसारीणि श्रोत्रमनःसंवननान्येव शोभयन्ते। गुणाश्च भूयांसः यथादृष्टं सर्वमनवद्यम्। श्रीगुरुचरणानां कृपयाऽस्य प्रबन्धकर्तुरितोऽधिकतया ज्ञानसम्पदायुरारोग्याद्यभिवृद्धिश्च बोभूयादिति भगवन्तं नाथमानः॥

त. श्रीनिवासाचार्यः॥

प्रधानसंस्कृतपण्डितः।

St. Joseph's College, Trichinopoly.

FOREWORD.

GREAT souls, like the late Sringeri Jagadguru Sri Sachidananda Sivabhinava Nrisimha Bharati Swamigal, are but the occasional blossomings of a race. In them are summed up the experiences of the past, the energies of the present and the prophecies of the future. It is India's greatness and glory that she has been able to produce such men in times of political decline as well as in times of political greatness. India's unexampled vitality has been the wonder of the world. In times of sorest need and greatest humiliation, her greatest, and noblest sons have been born. Among such unique men, the Swamigal, whose life and work have been sung in this excellent poem, was one of the noblest and the best.

He was born of learned and pious parents. His father was the famous Pandit Kunigal Rama Sastrigal. His elder brother was the equally famous Pandit Laxmi Nrisimha Sastrigal. Even in his early life the Swami was initiated into the Sanyasa Asrama by the then Jagadguru of Sringeri

according to the usage of the Mutt. The young swamigal had not only a precocious intellect but a loving heart and a pure soul. His smiling face was the outward manifestation of a glad and adoring heart which was full of beneficence and blessedness. Very soon his learning and his piety became the wonder of all. He adorned the holy seat for many years and went on tours to consolidate and improve Hindu spirituality, The great Sanskrit College in Bangalore and the beautiful temples built to Sri Saradadevi and Adi Sankaracharya at Kalati are among the greatest of his achievements.

It was the power of his purity and his universal love that drew to his feet such a wonderful variety of disciples and devoted admirers. Men of various castes and creeds and countries were bound to him by ties of reverence and love. An admirer of his in Holland always wore a miniature of his next to his heart. Further, he was a great *yogi*, a man of unique *tapas*, and a learned man whose learning blossomed in the perfection of his life. He was equally at home in all the *sastras* and yet his humility was touching to behold and was an object-lesson to all. He was not only a learned man but he was a great poet and man of letters. His verses were the spontaneous overflow of tense

moments of thought and meditation.—More than anything else, his *bhakthi* was flowing from him like a heavenly Ganga. It radiated from his whole being, shone in his eyes and broke into music from his smiling lips. In short his was a blessed life and it was a blessing unto all.

His works have been collected under the name of 'Bhakthi Sudha Tarangini' and published by the Sri Vani Vilas Press, Srirangam. They display a great variety of poetic and spiritual moods and contain short and clear presentations of the vital and essential doctrines of the Hindu religion. He has given a clear expositon of that subtle puzzle of Advaita Vedanta—the doctrine of *avidya*. In *Purushartha Nirnaya* he has given us a clear and convincing exposition of the aims of life. In another work of his he has expounded Advaita Brahma Vidya in a brief and beautiful manner.

He was, in short, one of the makers of New India, even though he did not adopt the modern agencies of the press and the platform. It is devotion to Indian culture that will preserve the Indianness of India and he was not only an incarnation of Indian culture but he kindled a true knowledge and love of that culture in the minds and hearts of innumerable persons in his generation.

This poem is full of reverence, of loveliness, and of melody. The author deserves praise and the gratitude of the public for dealing with a great soul and a great theme in a manner befitting both. I wish him every success and pray that the grace of our Guru and of God may rest on him and lead him to further and even greater achievements for the glory of India and of God.


K. S. RAMASWAMI SASTRI



॥ श्रीः ॥

॥ श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीगुरुचरणारविन्दाभ्यां नमः ॥

॥ श्रीमदाचार्यार्याशतकम् ॥



लोकानामुपकर्तुं
य इहावततार भूतगणराजः ।
आचार्यं तं जगतः
परमात्मानं दयानिधिं वन्दे ॥ १ ॥

क्षोण्यां यः सर्वेषां
तिमिरं दूरीचकार विबुधेन्द्रः ।
वाक्किरणैः सततं तं
मनसा ध्यायामि जनबन्धुम् ॥ २ ॥

यद्विरहेण रजन्यां
नीत्वा कृच्छ्रेण कालमतिदीर्घम् ।
प्रातः श्रीगुरुमित्रं
नमन्ति विनयेन बुधमुखाब्जानि ॥३॥

यस्यागमनं बालैः
प्रतीक्ष्यते प्रतिदिनं सबहुमानम् ।
सहपानमनुभवितुमिह
कलानिधेरिव सुधैकनिलयस्य ॥ ४ ॥

यस्य निवासेनैत-
द्भारतवर्षं समश्नुते श्रैष्ठ्यम् ।
छात्रा धन्याः सुस्त-
म्भेनेव गृहं निवासिनोऽप्यत्र ॥ ५ ॥

यत्पादपङ्कजरजः
पुनाति सद्यो गृहाणि शिष्याणाम् ।
अवलोकनं च सकृदपि
यस्यालमनुग्रहाय भक्तानाम् ॥ ६ ॥

सम्मानः पूज्यानां
सच्छीर्षभ्रमरसेवितपदाब्जानाम् ।
निःश्रेयसाय महते
महत्त्वयोगाय भवति भूरिमहिम्नाम् ॥

यत्कीर्तनमथ यत्स्मर-
णं यच्छ्रवणं निरीक्षणं च शुभम् ।

वन्दनमथार्हणा खलु
सद्यो विधुनोति दुरितमखिलानाम् ॥

श्रीलोकगुरुवदनप-
ङ्कजमकरन्दं पिबन्ति सोत्कण्ठम् ।
ज्ञानमयं सौम्यभ्रम-
राः सेवन्ते च सप्रहर्षामिह ॥ ९ ॥

श्रीलोकगुरुजलधरात्
पतितां बालहृदयभुवि वाग्वृष्टिम् ।
को नाम कोविदशिखी
पीत्वा नृत्यति न सप्रमोदामिह ॥१०॥

द्रष्टुं पच्छुभमूर्तिं
ह्यहमहमिकयानिशं विशन्ति जनाः ।
वीक्ष्याऽथ विधातारं
निन्दन्ति ह्याक्षिमात्रदं सर्वे ॥ ११ ॥

यद्वीक्षणेन मूर्खः
स्वकर्मनिरतः क्षणेन खलु भवति ।
भवभयहरं गुरुवरं
नूनं स्मृत्वा कृतार्थोऽहम् ॥ १२ ॥

आत्मन्येवात्मानं
सततं ध्यायन्विजित्य विषयिगणम् ।
भस्मतिरोहितपावक
इव जडरूपेण राजति यः ॥ १३ ॥

करुणारसवारिनिधे-
र्भक्तेष्वभयप्रदानदक्षस्य ।
पादाम्भोरुहमनिशं
स्मारं स्मारं सुखे निमज्जामि ॥ १४ ॥

भगवन्भवतः करुणा-
कटाक्षनिक्षेपमेव वांछामि ।
मुख्यं तमेव नित्यं
मन्ये शरणं भवाब्धितरणेऽहम् ॥१५॥

भवदावानलदग्धा-
नुज्जीवयदमृतरूपमेवेदम् ।
स्मेराननं सकरुणं
दर्शं दर्शं भवामि कृतकृत्यः ॥ १६ ॥

भगवंस्तवाननेन्दौ
प्रकाशमानेऽग्रतो नयनयोर्मे ।

तुच्छैरन्यैर्विषयैः
प्रयोजनं किं गुरुश्रेष्ठ ॥ १७ ॥

अद्याप्यसकृद्भगवन्
स्मेरास्यं ते ममाक्षिवर्त्मगतम् ।
आनन्दयति मनो मे
द्रढयति भक्तिं विचित्रमेवैतत् ॥

नीतं नैकमपि दिनं
भगवन्ध्यानं विना चरणयोस्ते ।
मन्ये वृथा दिनं तत्
यस्मिन्न ध्यायते गुरोः पादः ॥ १९ ॥

तरुरिव सन्तप्तानां
तरङ्गिणीव सलिलार्थिनः सततम् ।
भवसागरमग्नानां
भगवंस्तव पादयुगलमिह जयति ॥

कोविदषट्पदवृन्दैः
सेवितमनिशं गुरोः पदयुगं तत् ।
संसारसिन्धुतरणिः
सुरद्रुमः स्वाश्रितस्य शरणं मे ॥ २१ ॥

बुधमुखसरोरुहार्कं
स्मरणेनैव सुखदायकं नित्यम् ।
शमदमभूषितगात्रं
हृदये तेजोमयं गुरुं कलये ॥ २२ ॥

जगतो हिताय गुरवो
महामहिमशालिनोऽत्र जायन्ते ।
ईशस्य प्रतिनिधयो
वृषस्य रक्षां वहन्ति शिरसीह ॥२३॥

भगवन्महानुभावा
भवादृशा भुवि न चेदवतरान्ति ।
नूनं निराश्रयं स्यात्
वर्ष भारतामिदं तमोव्याप्तम् ॥ २४ ॥

कृत्यं न तेऽस्ति किंचित्
भगवन्परमात्मनिष्ठ संसारे ।
भवतस्तथापि करुणा
निरस्ततुलनैव केवला जयति ॥ २५ ॥

मनुजैर्न पीतममृतं
न चापि दृष्टं श्रुतं तु गुरुमुखतः ।

पीत्वा तव करुणारस-
मिहामृतं तर्कयन्ति रसिकजनाः ॥

भगवंस्तवोपदेशं
गृह्णन्को वा भवेन्न कृतकृत्यः ।
पीत्वा जलधरवर्षं
सम्यक्सस्यं प्रदर्शयति पुष्टिम् ॥ २७ ॥

संसारसिन्धुमग्नान्
दयानिधे तारयन्नहोरात्रम् ।
चित्रं न खिद्यसे त्वं
शम्भुं मन्येऽवतीर्णमिह लोके ॥ २८ ॥

संसारसिन्धुतारण-
दक्षेऽत्र गुरौ विराजमानेऽपि ।
निबिडान्धकारगहने
भवकान्तारे भ्रमन्ति शून्यदृशः ॥ २९ ॥

संसारकाननेऽस्मिन्
घोरे क्रीडन्मृगो मृगीभिरहो ।
न स्वं वृकैर्वृतमहो-
रात्रैर्जानाति हन्यमानं च ॥ ३० ॥

संसारे परिलुठनं
स्वप्ने स्वप्नं विडम्बयति सत्यम् ।
मूढस्तथापि चित्तं
गुरुं न गच्छति भवाब्धितरणाय ॥

पुरुषस्यायुः कालो-
ऽपहरति, मोहादयः सखायोऽस्य ।
वेत्ति न शरण्यमज्ञः
क्रीडासक्तो यथैव बालः स्वम् ॥ ३२ ॥

यावद्देहे ममता-
बुद्धिस्तावन्न भवति वैराग्यम् ।
तच्छ्रद्धाभक्तिनयै-
र्गुरूपसत्तिः कृता नरं रक्षेत् ॥ ३३ ॥

भगवंस्त्वदीयकरुणा-
कटाक्षलहरी मयापि मूढेन ।
गीतोपदेशपूर्वा
लब्धा सा विजयतेतमां लोके ॥ ३४ ॥

भगवन्यदा प्रतिदिनं
गीतां प्रातः पठामि सोत्कण्ठम् ।

रुद्राक्षभस्मकलितं
त्वदीयरूपं ममाग्रतो भाति ॥ ३५ ॥

क्वायं मन्दमतिः क्व च
गुरुचरणानां गभीरभाष्यं तत्
भवतः कटाक्षलेशो
ददाति शक्तिं तदर्थबोधे मे ।

आचार्यवर्य भगवन्
भवन्तमद्यापि शिष्यवर्गेषु
वेदान्तसूत्रभाष्य-
प्रवचनपटुमग्रतो निरीक्षेऽहम् ॥ ३७ ॥

देशीयकलाशाला-
सु त्वां भगवन्वटून्सतां मार्गम् ।
उपविश्य रत्नसिंहा-
सने कदाप्युपदिशन्तमीक्षेय ॥ ३८ ॥

पश्यामि त्वां भगवन्
कदापि रुद्राक्षभस्मकलिताङ्गम् ।
श्रीचन्द्रशेखरेन्द्रं
मुदा भजन्तं प्रगाढभक्त्याऽहम् ॥

SANSKRIT VIDYA PEETHA LIBRARY
12369

सदसि कदाचिद्विदुषां
　बहन्तमग्रासनाधिपत्यं त्वाम् ।
वादीभसिंहतर्क-
　श्रवणासक्तं निरीक्षेऽहम् ॥ ४० ॥

असकृद्भगवन्पूजा-
　समये गीतां पठन्यथादेशम् ।
स्मेराननं भवन्तं
　प्रविशन्तं मम गृहं शनैरीक्षे ॥ ४१ ॥

भगवन्भवत्सकाशात्
　ब्रह्मविचारः कथं नु सिद्ध्येन्मे ।
इति चिन्तासीद्हृदये
　वृत्तिर्मां नान्वजानीत ॥ ४२ ॥

वेदान्तशास्त्रनिपुणो
　ऽपि पात्रभूतो न चेद्गुरुकृपायाः ।
व्यर्थं भवेदधीतं
　निरर्थकं भुवि नरस्य जन्मापि ॥ ४३ ॥

शरणं व्रजामि भगवन्
　तव पदपङ्कजमनिन्दितं नित्यम् ।

लोके भवाब्धितारण-
कृताभिषेकं विजयते तत् ॥ ४४ ॥

भगवन्भवान्भवाब्धिं
तीर्त्वा रमते च मोक्षसाम्राज्ये ।
यस्मिन्नखिलमपि सुखं
मायाकल्पितमिहाभाति ॥ ४५ ॥

पश्यतु भवान्कृपालो
भक्तिं त्वत्पादबद्धहृदयां मे ।
तव करुणामृतपुष्टां
सहासचेष्टां सुदेव दीव्यन्तीम् ॥

करुणारसार्थिनीयं
भगवन्बाला तवाङ्घ्रिमूलस्पृक् ।
रोदिति मुखं रसज्ञा
कदाचिदवलोकमाना ते ॥ ४७ ॥

सुखमुपविष्टा समये
गता त्वदाननसुधांशुलक्ष्यं सा ।
भगवन्प्रसारितकरा
भवन्तमुपसर्पति स्नेहात् ॥ ४८ ॥

स्वामिंस्त्वामितरेषा-
मनुग्रहव्यापृतं कदाप्येषा ।
दृष्ट्वा तदसहमाना
परितो नयने क्षिपन्त्यास्ते ॥ ४९ ॥

भगवन्भवदुपदेशं
दृढं गृहीत्वा तवान्तिके बाला ।
उच्चरति बीजमन्त्रं
पठति च गीतां प्रभो पश्य ॥ ५० ॥

प्रतिदिनमियं प्रथमतो
भागवतं ब्रह्मसूत्रमथ गीताम् ।
पठति वरसन्निधौ ते
ऽथ देवपूजां करोति निःसङ्गा ॥ ५१ ॥

रामायणपारायण-
मथ विष्णुसहस्रनामपठनं च ।
आचार्यनुतिरथेत्थं
समयः प्रातरुपयुज्यते सार्थः ॥ ५२ ॥

सौदर्यस्या ज्येष्ठा
श्रद्धा सहकारिणी च सर्वत्र ।

यस्या वियोगमेषा
बाला न कदापि विषहते भक्तिः ॥

भगवन्सोदर आस्ते
ऽस्या नय इति विश्रुतो जगत्यस्मिन् ।
विश्लेषमस्य नितरां
न खलु सहेते सहोदर्यौ ॥ ५४ ॥

अयमग्रतो गुरूणां
कथयति सदुपस्थितिं सहोदर्योः ।
भक्तिश्रद्धे वृणुत-
स्ततः प्रसादं गुरोः सकाशाच्च ॥ ५५ ॥

वितरति गुरुः प्रसादं
ताभ्यां प्रीत्योपदिशति तत्त्वार्थम् ।
अचिरेण सत्त्वशुद्धि
र्भविष्यति फलं प्रसादसङ्गेन ॥ ५६ ॥

भगवंश्चिरेण बाल्या-
दार्सीद्रासार्चने ममौत्कण्ठ्यम् ।
स मनोरथः कदा वा
सिद्ध्येदिति मेऽभवन्मनस्तापः ॥५७॥

भगवंस्तव प्रसादा
लब्धः श्रीरामविग्रहो रम्यः ।
यत्र खलु भक्तवत्सल
आस्ते जायासहोदरैः साकम् ॥ ५८ ॥

वायोः सुतो भगवतो
दक्षिणपादं वहन्स्वहस्ताभ्याम् ।
मोदाम्बुधौ निमज्जति
लब्ध्वा शेवधिमकिंचन इव गुरो ॥

यद्यत्करोमि भगवन्
रामायाहं तदर्पयाम्यखिलम् ।
किं बहुना मम गेहं
श्रीरामभवनमिति ख्यातम् ॥ ६० ॥

स्वागतमिह साधूनां
निर्मलमनसां महात्मनां विदुषाम् ।
इतरेषान्त्वागमनं
यथा दिवि तथा निषिद्ध्यते काममम् ॥

संसारकाननेऽस्मिन्
सहायमपरं विहाय गुरुचरणान् ।

भगवन्नोपलभेऽहं
प्रज्ञाचक्षुर्हि नास्ति सर्वेषाम् ॥ ६२ ॥

देशिकमणे यदि पुमान्
कश्चिन्मार्गं दिशेति पृष्टश्चेत् ।
पतितः स्वयं भवेऽस्मिन्
कष्टं मामपि स पातयति गर्तं ॥ ६३ ॥

गुरुवर तव करुणामृत-
महं पिबन्नाविरतं न तृप्तोऽस्मि ।
महिमा प्रभो तव चरण-
युगस्य यन्मे मनस्तदेकाग्रम् ॥ ६४ ॥

भगवन्निदं भवन्तं
प्रणम्य शिरसा मुहुर्मुहुर्याचे ।
विहरतु मनो मदीयं
त्वदीयपदपङ्कजे नित्यम् ॥ ६५ ॥

एतावता कृतार्थो
भवेयमिति मे मतिर्दृढा भगवन् ।
निहितादिमसंस्थापन-
शिला भवेन्मोक्षराज्यस्य ॥ ६६ ॥

भगवन्कृपाजलनिधे
निर्वापय तूर्णमेव भवतापम् ।
कालविलम्बं सहसे
कथं वनद्युताशनार्दितः पुरुषः ॥ ६७ ॥

गुरुवर भवतापोऽयं
सत्यं दावमतिवर्तते लोके ।
आमरणाद्दहति भवो-
ऽपरस्तु तत्काल एवेति ॥ ६८ ॥

अफलं पुष्पितमग्रे
पादपमेनं क आश्रयेल्लोके ।
दृष्ट्वा श्रुत्वा निष्फल-
मस्मान्मतिमानुपरमति त्वरितम् ॥ ६९ ॥

भगवंस्तव पादरजो
भवरोगनिवारणैकभैषज्यम् ।
भूतोच्चाटनमन्त्रः
सर्वत्राप्यभयदं विजयते तत् ॥ ७० ॥

परिशोधनेन भगव-
न्नलमुद्धर पाहि मां च भवगर्तात् ।

तिष्ठन्नुपर्यधो मां
पश्यन्क्रीडसि कथं परेण त्वम् ॥ ७१ ॥

धिगिदं भ्रमणं मम भव-
चक्रे ग्रन्थिं शिथिलय भगवन्मोः ।
अविवेकबलीवर्दो-
ऽपसरतु जीवोऽनुभवतु शान्तिं च ॥

भगवन्ग्रन्थेः शिथिली-
करणे भवतः श्रमोऽस्ति नेषदपि ।
तत्र करुणाकटाक्षः
किंचित्तेऽपेक्ष्यते नान्यत् ॥ ७३ ॥

भगवंस्तवाङ्घ्रिमूलं
नाहं मुञ्चामि वन्दितं सम्भ्रः ।
प्रार्थ्यं किमस्ति मेऽतः
परं प्रसीद प्रसीद शरणं भोः ॥ ७४ ॥

भगवन्भवदद्भुतत्वे-
ष्टितैः सहृदयो भवन्तमादिगुरुम् ।
सशिरःकम्पं निपुणं
वदुयुक्तिभिरूहते प्रभुं लोके ॥ ७५ ॥

भगवंस्त्वमेव जनको
माता भ्रात्रादिबन्धुवर्गश्च ।
एतैः प्रयोजनं स्या
त्केवलसंसारबन्धमूलैः किम् ॥ ७६ ॥

गुरुवर तवाङ्घ्रिरजसा
विभूषिताङ्गो दिने दिने शुचिना ।
आत्मस्नानं कर्तुं
ममास्ति वाञ्छा परं न सिद्धयति सा ॥

उदरनिमित्ते प्रायो
भगवन्नहि विनियुज्यते कालः ।
रात्रौ श्रमापनयनं
चायुरिति क्षीणभूयिष्ठम् ॥ ७८ ॥

भगवन्मायामहिमे-
दं यदहम्प्रत्ययः परं ब्रह्म ।
अप्रत्यक्षमसत्यं
मृषा जगादिदं ध्रुवं भाति ॥ ७९ ॥

मिथ्यात्मके भवेऽस्मिन्
न विद्यते खलु सुखस्य लेशोऽपि ।

चिन्नं तथापि जन्तु-
मायावश्यः पुनः पतति तस्मिन् ॥८०॥

ज्ञानं परोक्षमेवा-
स्तिक्रममुक्तिदमतृप्त एवाहम् ।
यावद्गुरो मलिनवा-
सना न गच्छति बहिर्देहात् ॥ ८१ ॥

अनया दुर्वासनया
तिरोहितमहो यथार्थवस्त्वेकम् ।
नाहं द्रष्टुं शक्तः
कृपया भगवन्प्रदर्शय तत् ॥ ८२ ॥

वितरसि यदि प्रसादं
तदा दुरितवासना बहिर्गच्छेत् ।
अथवा बत मम पतनं
दुर्वारं स्यात्कथंचिदपि ॥ ८३ ॥

भगवन्ननुभवसिद्धं
यदिन्द्रियाणां मतिर्भवति धिष्ण्यम् ।
चपलाऽविश्वसनीया
महद्भिरपि कामिनी यथा गेहे ॥ ८४ ॥

भगवन्भवत्प्रसादात्
मनसः सम्पादयामि नैर्मल्यम् ।
सर्वमिदमहं च ब्र-
ह्मेति मतिरनाविला भवति ॥ ८६ ॥

को वा रमते भगव-
न्ननात्मनि जडे जडादृते लोके ।
मायाकल्पितमेत-
द्विडम्बयति मरुमरीचिकां हि जगत् ॥

विण्मूत्रमांसशोणित-
भरिते देहे स्वभावदुर्गन्धे ।
गुरुवर ममतावुद्धि-
र्माभून्माभूत्कदाचिदपि ॥ ८७ ॥

स्नानैः सुगन्धमालिलै-
र्मलापकर्षणविधाभिरथवा किम् ।
तिलकेन किं सुमैः किं
प्रत्यक्षाशुचिशरीरस्य ॥ ८८ ॥

भगवन्नास्मिन्नरके
नरस्य नोदेति यस्य वैराग्यम् ।

श्रवणं किं शतकृत्वो
धिरक्तिमुत्पादयति तस्य ॥ ८९ ॥

आकाशवदयमात्मा
पूर्णः सर्वत्र वर्तते नित्यः ।
शुद्धः स एव मलिनो-
पाधेर्दोषाद्व्यवहरतीवास्ते ॥ ९० ॥

भगवन्मलिनमिहैकं
स्थानविशेषाद्बहुविधतां भजते ।
आत्माप्युपाधिसङ्गा-
न्मनुष्यदेवादिभिन्नतामेति ॥ ९१ ॥

भगवन्यथा न कृपणो
भवामि लोके तथा प्रसीद मयि ।
मोहकलिलं मम मनः
प्रसीदतु तव प्रसादलेशेन ॥ ९२ ॥

गुरुवर तव प्रसादा-
त्क्रमेण सिद्ध्यतु स बुद्धियोगो मे ।
नश्यतु च वासनेयं
भानोरुदये तमिस्रेव ॥ ९३ ॥

भगवन्नतः परमहं
ब्रह्मानन्दे रमे निराकाङ्क्षः ।
नष्टे मूले कस्मा-
दुदयः सिद्ध्येद्दादाङ्कुरस्यात्र ॥ ९४ ॥

आत्मानन्दनिमग्नः
पुरुषः कामान्न वाञ्छति क्षुद्रान् ।
अमृतं पीत्वा लवणम-
याम्भः पातुं प्रवर्तते को वा ॥ ९५ ॥

भगवन्सफलं जातं
जन्मेदं मम भवामि कृतकृत्यः ।
अधुनाऽल्पा मम वाणी
प्रयोजनवतीति मन्येऽहम् ॥ ९६ ॥

मन्ये वृथैव वाणीं
प्रकटीक्रियते न चेद्गुरोर्महिमा ।
भगवन्यथाकथंचि-
न्मनोरथः पूर्तिमाप कृपया ते ॥ ९७ ॥

गीतोपदेशकाले
भगवन् रूपेण येन कृपयाऽहम् !

भवताऽनुगृहीतः खलु
तन्मम हृदये प्रकाशते रूपम् ॥ ९८ ॥

क्वायं मन्दमतिः क्व च
महामहिमचेतसो जगद्गुरवः ।
आचार्यवर्यकृपया
रचितामिदं रञ्जयतु विदां चेतः ॥९९॥

भक्त्येदं यो गायति
स वृद्धिरेफः स्मितास्यशतपत्रस्य ।
पिबति कृपामकरन्दं
ह्यभिनवनरसिंहभारतीचरणानाम् ॥

नाहं वैयाकरण उत वा तार्किकः काव्यतीर्थः
मीमांसायां कृतपरिचयो नापि सङ्गीतविद्वान् ।
शास्त्रे कस्मिन्वद परिचितिर्बालकानां शुकानां
तेषां भावं मयि कुरु विभो देशिकेन्द्र प्रसीद ॥

आर्यावृत्तशतैः कृपाजलनिधेराचार्यवर्यस्य यत्
स्तोत्रं तस्य कृपावलोकनबलाद्देदीप्यमानं गुणैः ।
आचार्यस्य पदाब्जलग्नमनसा विद्याविनोदेन तत्
श्रीरामेण कृतं सगौरवमिह श्रीदेशिकायार्प्यते ॥

लब्ध्वा यत्करुणाकटाक्षलहरीं
प्रेमप्रसादार्द्रतां
चन्द्रस्यानियतां महार्हसुषमां
धिक्कुर्वतीं शोभया ।
नष्टं मे परमार्थरोधि तिमिरं
ज्ञानाङ्कुरश्चोद्गत-
स्तस्य स्मारकमस्त्विदं मम गुरो-
राचन्द्रतारं भुवि ॥

॥ इति श्रीमदाचार्यार्याशतकं सम्पूर्णम् ॥

MAHARAJA SAYAJIRAO UNIVERSITY LIBRARY, BARODA * KIRTI MANDIR
12369
015.1
N24

